শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে

# ॥ ত্রিসপ্ততিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ত্রিসপ্ততিতমঃ সর্গঃ ॥

## শ্রীরামাদীনাং চতুর্ণাং ভ্রাতৄণাং ৱিৱাহঃ

যস্মিংস্তু দিৱসে রাজা চক্রে গোদানমুত্তমম্।
তস্মিংস্তু দিৱসে ৱীরো যুধাজিৎ সমুপেযিৱান্॥ **1.73.1** ॥

পুত্রঃ কেকযরাজস্য সাক্ষাদ্ভরতমাতুলঃ।
দৃষ্টৱা পৃষ্টৱা চ কুশলং রাজানমিদমব্রৱীৎ॥ **1.73.2** ॥

কেকযাধিপতী রাজা স্নেহাৎ কুশলমব্রৱীৎ।
যেষাং কুশলকামোঽসি তেষাং সম্প্রত্যনামযম্॥ **1.73.3** ॥

স্বস্ত্রীযং মম রাজেন্দ্র দ্রষ্টুকামো মহীপতিঃ।
তদর্থমুপযাতোঽহমযোধ্যাং রঘুনন্দন॥ **1.73.4** ॥

শ্রুৎৱা ৎৱহমযোধ্যাযাং ৱিৱাহার্থং তৱাত্মজান্।
মিথিলামুপযাতাংস্তু ৎৱযা সহ মহীপতে॥ **1.73.5** ॥

ৎৱরযাভ্যুপযাতোঽহং দ্রষ্টুকামঃ স্বসুঃ সুতম্।
অথ রাজা দশরথঃ প্রিযাতিথিমুপস্থিতম্॥ **1.73.6** ॥

দৃষ্টৱা পরমসৎকারৈঃ পূজনার্হমপূজযৎ।
ততস্তামুষিতো রাত্রিং সহ পুত্রৈর্মহাত্মভিঃ॥ **1.73.7** ॥

প্রভাতে পুনরুত্থায কৃৎৱা কর্মাণি তত্ত্ৱৱিৎ।
ঋষীংস্তদা পুরস্কৃত্য যজ্ঞৱাটমুপাগমৎ॥ **1.73.8**॥

যুক্তে মুহূর্তে ৱিজযে সর্ৱাভরণভূষিতৈঃ।
ভ্রাতৃভিঃ সহিতো রামঃ কৃতকৌতুকমঙ্গলঃ॥ **1.73.9**॥

ৱসিষ্ঠং পুরতঃ কৃৎৱা মহর্ষীনপরানপি।
ৱসিষ্ঠো ভগৱানেত্য ৱৈদেহমিদমব্রৱীৎ॥ **1.73.10**॥

রাজা দশরথো রাজন্ কৃতকৌতুকমঙ্গলৈঃ।
পুত্রৈর্নরৱরশ্রেষ্ঠো দাতারমভিকাঙ্ক্ষতে॥ **1.73.11**॥

দাতৃপ্রতিগ্রহীতৃভ্যাং সর্ৱার্থাঃ সম্ভৱন্তি হি।
স্ৱধর্মং প্রতিপদ্যস্ৱ কৃৎৱা ৱৈৱাহ্যমুত্তমম্॥ **1.73.12**॥

ইত্যুক্তঃ পরমোদারো ৱসিষ্ঠেন মহাত্মনা।
প্রত্যুৱাচ মহাতেজা ৱাক্যং পরমধর্মৱিৎ॥ **1.73.13**॥

কঃ স্থিতঃ প্রতিহারো মে কস্যাজ্ঞাং সম্প্রতীক্ষতে।
স্ৱগৃহে কো ৱিচারোঽস্তি যথা রাজ্যমিদং তৱ॥ **1.73.14**॥

কৃতকৌতুকসর্ৱস্ৱা ৱেদিমূলমুপাগতাঃ।
মম কন্যা মুনিশ্রেষ্ঠ দীপ্তা ৱহ্নেরিৱার্চিষঃ॥ **1.73.15**॥

সদ্যোঽহং ৎৱৎপ্রতীক্ষোঽস্মি ৱেদ্যামস্যাং প্রতিষ্ঠিতঃ।
অৱিঘ্নং ক্রিযতাং সর্ৱং কিমর্থং হি ৱিলম্ব্যতে॥ **1.73.16**॥

তদ্ ৱাক্যং জনকেনোক্তং শ্রুৎৱা দশরথস্তদা।
প্রৱেশযামাস সুতান্ সর্ৱানৃষিগণানপি॥ **1.73.17**॥

ততো রাজা ৱিদেহানাং ৱসিষ্ঠমিদমব্রৱীৎ।
কারযস্ৱ ঋষে সর্ৱামৃষিভিঃ সহ ধার্মিক॥ **1.73.18**॥

রামস্য লোকরামস্য ক্রিযাং ৱৈৱাহিকীং প্রভো।
তথেত্যুক্ত্বা তু জনকং ৱসিষ্ঠো ভগৱানৃষিঃ॥ **1.73.19** ॥

ৱিশ্বামিত্রং পুরস্কৃত্য শতানন্দং চ ধার্মিকম্।
প্রপামধ্যে তু ৱিধিৱদ্ ৱেদিং কৃৎৱা মহাতপাঃ॥ **1.73.20** ॥

অলঞ্চকার তাং ৱেদিং গন্ধপুষ্পৈঃ সমন্ততঃ।
সুৱর্ণপালিকাভিশ্চ চিত্রকুম্ভৈশ্চ সাঙ্কুরৈঃ॥ **1.73.21** ॥

অঙ্কুরাঢ্যৈঃ শরাৱৈশ্চ
ধূপপাত্রৈঃ সধূপকৈঃ।
শঙ্খপাত্রৈঃ স্রুৱৈঃ স্রগ্ভিঃ
পাত্রৈরর্ঘ্যাদিপূজিতৈঃ॥ **1.73.22** ॥

লাজপূর্ণৈশ্চ পাত্রীভিরক্ষতৈরপি সংস্কৃতৈঃ।
দর্ভৈঃ সমৈঃ সমাস্তীর্য ৱিধিৱন্মন্ত্রপূর্ৱকম্॥ **1.73.23** ॥

অগ্নিমাধায তং ৱেদ্যাং ৱিধিমন্ত্রপুরস্কৃতম্।
জুহাৱাগ্নৌ মহাতেজা ৱসিষ্ঠো মুনিপুঙ্গৱঃ॥ **1.73.24** ॥

ততঃ সীতাং সমানীয সর্ৱাভরণভূষিতাম্।
সমক্ষমগ্নেঃ সংস্থাপ্য রাঘৱাভিমুখে তদা॥ **1.73.25** ॥

অব্রৱীজ্জনকো রাজা কৌসল্যানন্দৱর্ধনম্।
ইযং সীতা মম সুতা সহধর্মচরী তৱ॥ **1.73.26** ॥

প্রতীচ্ছ চৈনাং ভদ্রং তে পাণিং গৃহ্ণীষ্ৱ পাণিনা।
পতিৱ্রতা মহাভাগা ছাযেৱানুগতা সদা॥ **1.73.27** ॥

ইত্যুক্ত্বা প্রাক্ষিপদ্ রাজা মন্ত্রপূতং জলং তদা।
সাধুসাধ্ৱিতি দেৱানামৃষীণাং ৱদতাং তদা॥ **1.73.28** ॥

দেৱদুন্দুভিনির্ঘোষঃ পুষ্পৱর্ষো মহানভূৎ।
এৱং দত্ত্বা সুতাং সীতাং মন্ত্রোদকপুরস্কৃতাম্॥ **1.73.29** ॥

অব্রৱীজ্জনকো রাজা হর্ষেণাভিপরিপ্লুতঃ।
লক্ষ্মণাগচ্ছ ভদ্রং তে ঊর্মিলামুদ্যতাং মযা॥ **1.73.30** ॥

প্রতীচ্ছ পাণিং গৃহ্ণীষ্ৱ মা ভূৎ কালস্য পর্যযঃ।
তমেৱমুক্ত্বা জনকো ভরতং চাভ্যভাষত॥ **1.73.31** ॥

গৃহাণ পাণিং মাণ্ডৱ্যাঃ পাণিনা রঘুনন্দন।
শত্রুঘ্নং চাপি ধর্মাত্মা অব্রৱীন্মিথিলেশ্ৱরঃ॥ **1.73.32** ॥

শ্রুতকীর্তের্মহাবাহো পাণিং গৃহ্ণীষ্ৱ পাণিনা।
সর্ৱে ভৱন্তঃ সৌম্যাশ্চ সর্ৱে সুচরিতৱ্রতাঃ॥ **1.73.33** ॥

পত্নীভিঃ সন্তু কাকুৎস্থা মা ভূৎ কালস্য পর্যযঃ।
জনকস্য ৱচঃ শ্রুৎৱা পাণীন্ পাণিভিরস্পৃশন্॥ **1.73.34** ॥

চৎৱারস্তে চতসৃণাং ৱসিষ্ঠস্য মতে স্থিতাঃ।
অগ্নিং প্রদক্ষিণং কৃৎৱা ৱেদিং রাজানমেৱ চ॥ **1.73.35** ॥

ঋষীংশ্চাপি মহাত্মানঃ সহভার্যা রঘূদ্ৱহাঃ।
যথোক্তেন ততশ্চক্রুর্ৱিৱাহং ৱিধিপূর্ৱকম্॥ **1.73.36** ॥

পুষ্পৱৃষ্টির্মহত্যাসীদন্তরিক্ষাৎ সুভাস্ৱরা।
দিৱ্যদুন্দুভিনির্ঘোষৈর্গীতৱাদিত্রনিঃস্ৱনৈঃ॥ **1.73.37** ॥

ননৃতুশ্চাপ্সরঃসঙ্ঘা গন্ধর্ৱাশ্চ জগুঃ কলম্।
ৱিৱাহে রঘুমুখ্যানাং তদদ্ভুতমদৃশ্যত॥ **1.73.38** ॥

ঈদৃশে ৱর্তমানে তু তূর্যোদ্ঘুষ্টনিনাদিতে।
ত্রিরগ্নিং তে পরিক্রম্য ঊহুর্ভার্যা মহৌজসঃ॥ **1.73.39** ॥

অথোপকার্যং জগ্মুস্তে সভার্যা রঘুনন্দনাঃ।
রাজাপ্যনুযযৌ পশ্যন্ সর্ষিসঙ্ঘঃ সবান্ধৱঃ ॥ **1.73.40** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে ত্রিসপ্ততিতমঃ সর্গঃ ॥